# Shri Svapnavilasamritashtakam

# શ્રીસ્વપ્નવિલાસામૃતાષ્ટકમ્

## Document Information

Text title : svapnavilAsAmRRitAShTakam

File name : svapnavilAsAmRRitAShTakam.itx

Category : devii, rAdhA, aShTaka, vishvanAthachakravartin, stavAmRRitalaharI, devI

Location : doc_devii

Author : Vishwanatha Chakravarti

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Proofread by : Jan Brzezinski, Neal Delmonico

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 16, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીસ્વપ્નવિલાસામૃતાષ્ટકમ્

પ્રિયે ! સ્વપ્ને દૃષ્ટા સરિદિનસુતેવાત્ર પુલિનં
    યથા વૃન્દારણ્યે નટનપટવસ્તત્ર બહવઃ ।
મૃદઙ્ગાદ્યં વાદ્યં વિવિધમિહ કશ્ચિદ્દ્વિજમણિઃ
    સ વિદ્યુદ્ગૌરાઙ્ગઃ ક્ષિપતિ જગતીં પ્રેમજલધૌ ॥ ૧॥

કદાચિત્કૃષ્ણેતિ પ્રલપતિ રુદન્ કર્હિચિદસૌ
    ક્વ રાધે હા હેતિ શ્વસિતિ પતતિ પ્રોજ્ઝતિ ધૃતિમ્ ।
નટત્યુલ્લાસેન ક્વચિદપિ ગણૈઃ સ્વૈઃ પ્રણયિભિ-
    સ્તૃણાદિબ્રહ્માન્તં જગદતિતરાં રોદયતિ સઃ ॥ ૨॥

તતો બુદ્ધિર્ભ્રાન્તા મમ સમજનિ પ્રેક્ષ્ય કિમહો
    ભવેત્સોઽયં કાન્તઃ કિમયમહમેવાસ્મિ ન પરઃ ।
અહં ચેત્ક્વ પ્રેયાન્મમ સ કિલ ચેત્ક્વાહમિતિ મે
    ભ્રમો ભૂયો ભૂયાનભવદથ નિદ્રાં ગતવતી ॥ ૩॥

પ્રિયે ! દૃષ્ટ્વા તાસ્તાઃ કુતુકિનિ મયા દર્શિતચરી
    રમેશાદ્યા મૂર્તીર્ન ખલુ ભવતી વિસ્મયમગાત્ ।
કથં વિપ્રો વિસ્માપયિતુમશકત્ત્વાં તવ કથં
    તથા ભ્રાન્તિં ધત્તે સ હિ ભવતિ કો હન્ત કિમિદમ્ ॥ ૪॥

ઇતિ પ્રોચ્ય પ્રેષ્ઠાં ક્ષણમથ પરામૃષ્ય રમણો
    હસન્નાકૂતજ્ઞં વ્યનુદદથ તં કૌસ્તુભમણિમ્ ।
તથા દીપ્તં તેને સપદિ સ યથા દૃષ્ટમિવ ત-
    દ્વિલાસાનાં લક્ષ્મં સ્થિરચરગણૈઃ સર્વમભવત્ ॥ ૫॥

વિભાવ્યાથ પ્રોચે પ્રિયતમ મયા જ્ઞાતમખિલં
    તવાકૂતં યત્ત્વં સ્મિતમતનુથાસ્તત્ત્વમસિ સઃ ।
સ્ફુટં યન્ નાવદીર્યદભિમતિરત્રાપ્યહમિતિ
    સ્ફુરન્તી મે તસ્માદહમપિ સ એવેત્યનુમિમે ॥ ૬॥

યદપ્યસ્માકીનં રતિપદમિદં કૌસ્તુભમણિં
    પ્રદીપ્યાત્રૈવાદીદૃશદખિલજીવાનપિ ભવાન્ ।
સ્વશક્ત્યાવિર્ભૂય સ્વમખિલવિલાસં પ્રતિજનં
    નિગદ્ય પ્રેમાબ્ધૌ પુનરપિ તદાધાસ્યસિ જગત્ ॥ ૭॥

યદુક્તં ગર્ગેણ વ્રજપતિસમક્ષં શ્રુતિવિદા
    ભવેત્પીતો વર્ણઃ ક્વચિદપિ તવૈતન્ ન હિ મૃષા ।
અતઃ સ્વપ્નઃ સત્યો મમ ચ ન તદા ભ્રાન્તિરભવત્
    ત્વમેવાસૌ સાક્ષાદિહ યદનુભૂતોઽસિ તદ્દૃતમ્ ॥ ૮॥

પિબેદ્યસ્ય સ્વપ્નામૃતમિદમહો ચિત્તમધુપઃ
    સ સન્દેહસ્વપ્નાત્ત્વરિતમિહ જાગર્તિ સુમતિઃ ।
અવાપ્તશ્ચૈતન્યં પ્રણયજલધૌ ખેલતિ યતો
    ભૃશં ધત્તે તસ્મિન્નતુલકરુણાં કુઞ્જનૃપતિઃ ॥ ૯॥

ઇતિ શ્રીવિશ્વનાથચક્રવર્તિઠક્કુરવિરચિતસ્તવામૃતલહર્યાં
        શ્રીસ્વપ્નવિલાસામૃતાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Svapnavilasamritashtakam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*